ज्ञानानां विशिष्टवैशिष्ट्यावगाहितायाः विमर्शः

नवीन होळळः

रक्तदण्डवान् पुरुषः इति समानशब्दोल्लिखितानां ज्ञानानां क्वचिद् विशिष्टवैशिष्ट्यावगाहित्वं क्वचिद् विशेष्ये विशेषणमिति रीत्या अवगाहित्वमिति वैलक्षण्यमङ्गीक्रियते। अत्र प्रमाणं युक्तिरेव। निरुक्ताकारकस्य कस्यचिज्ज्ञानस्य रक्तदण्डवान् न वा इति संशयनिवर्तकत्वं कस्यचित् तदनिवर्तकत्वमिति, विशिष्टवैशिष्ट्यावगाहिज्ञाने रक्तदण्डवान् पुरुष इत्याकारके अयमेव विशेषः - अत्र मुख्यविशेष्ये पुरुषादौ विशेषणीभूतदण्डांशे रक्तत्वादिकमपि परम्परासम्बन्धेन विशेषणीभूय भासते इति। एतादृश-वैशिष्ट्यावगाहने च विशेषणतावच्छेदकीभूतरक्त-त्वादिधर्मप्रकारदण्डादिविशेष्यकः रक्तो दण्ड इत्या-द्याकारको निश्चयः कारणमिति सयुक्तिकं यथाशास्त्रं विविधमतविमर्शनपूर्वकं साधीयसा प्रकारेण विमृश्य निश्चिनोति प्रस्तोता।

'घटमहं जानामि' इत्यापामरलोकानामबाधितप्रतीतिः ज्ञानानाम् ऐन्द्रियकत्वं साधयति। बाह्येन्द्रियागोचरस्य ज्ञानस्य अन्तरिन्द्रियग्राह्यत्वेन प्रत्यक्षत्वमुपपादयन्ति न्यायविदः। युक्तिबलात्तु अतीन्द्रियमपि किञ्चिज्ज्ञानं निर्विकल्पकाख्यं निष्प्रकारविशेष्यसंसर्गकं सिद्ध्यद् अनुव्यवसीयमानेन घटादिव्यवसायेन सविकल्पकाख्येन सह ज्ञानानां स्वभाववैचित्र्यमादधाति सप्रकारकत्वनिष्प्रकारत्वाभ्याम्।

सविकल्पकानां स्वभाववैचित्र्यम्

ऐन्द्रियकेष्वपि ज्ञानेषु स्वभाववैचित्र्यमुच्चावचमाविष्कृतं प्रमाणशास्त्रे। तत्र प्रत्यक्षत्वानुमित्त्वादि- वैजात्येन वैचित्र्यं 'साक्षात्करोमि, अनुमिनोमि, उपमिनोमि, शाब्दयामि' इत्याद्यनुव्यवसायगम्यं सामग्रीभेदप्रयुक्तम्। अनुभवत्वस्मृतित्त्वाभ्यां वैचित्र्यं

'अनुभवामि, स्मरामि' इति प्रतीतिसाक्षिकं सामग्रीभेदप्रयुक्तम्। अननुगताभ्यां संशयत्वनिश्चत्वाभ्यां वैचित्र्यामपि 'सन्देह्मि, निश्चिनोमि' इति प्रतीतिसाक्षिकमेव सामग्रीभेदप्रयुक्तम्।

क्वचित्तु युक्तिबलादेव वैचित्र्यमास्थीयते, यथा धर्मितावच्छेदकपर्वतत्त्वावच्छेदेन विधेयवह्न्यवगाहितया तादृशपर्वतत्त्वसामानाधिकरण्यमात्रेण तादृशवह्न्यवगाहितया च वैचित्र्यं समानाकारकयोरपि 'पर्वतो वह्निमान्' इति ज्ञानयोः। विभिन्नरूपावच्छिन्नधर्मिताकयोः 'द्रव्यं वह्निमत्, ह्रदो वह्न्यभाववान्' इति ज्ञानयोः प्रतिबध्य-प्रतिबन्धकभावविरहेण समानरूपावच्छिन्नधर्मिताकत्वविवक्षणस्यावश्यकत्वेऽपि 'काञ्चनमयह्रदो वह्निमान्, रजतमयह्रदो न वह्निमान्' इति ज्ञानयोः प्रतिबध्यप्रतिबन्धकभावविराहोपपादनाय, धर्मितावच्छेदकतापर्याप्तेः प्रवेशने 'काञ्चनमयह्रदो वह्निमान्, ह्रदो न वह्निमान्' इति बुद्ध्योः क्वचित् प्रतिबद्ध्यप्रतिबन्धकभावोऽनुभूयमानः नोपपद्यते। अतो ज्ञानानां धर्मितावच्छेदकावच्छेदेन विधेयावगाहित्वं, ज्ञानयोरन्यतरस्य तद्वत्तायाः प्रतिबध्यप्रतिबन्धकभावे तन्त्रत्वं चोपेयते। तथा च 'ह्रदो न वह्निमान्' इति बुद्धेः ह्रदत्वावच्छेदेन वह्न्यभावरूपविधेयावगाहितया 'काञ्चनमयह्रदो वह्निमान्' इति बुद्धौ प्रतिबन्धकतोपपद्यते। तत्र बुद्धौ क्वचित् 'ह्रदो वह्न्यभाववान् इति ज्ञानस्य, सर्वोषं 'रजतमयह्रदो वह्न्यभाववान्' इत्यादीनामधिकावगाहिज्ञानानां चाप्रतिबन्धकत्वमपि धर्मितावच्छेदकह्रदत्वसामानाधिकरण्यमात्रावगाहितयोपपद्यते। तदेतत् धर्मितावच्छेदकवच्छिन्नत्वावगाहित्वतदनवगाहित्वाभ्यां वैचित्र्यं समानाकारकाणां समानजातीयानामपि ज्ञानानामतो निखिलप्रत्यक्षत्वादिवैजात्यसङ्कीर्णं तत्। प्रत्यक्ष इव अनुमित्युपमितिशाब्दादिषु अस्याः द्वयीरीतेरुपलम्भात्।

इत्थमेव विशिष्टवैशिष्ट्यावगाहितया विशेष्ये विशेषणमिति रीत्यावगाहितया च वैचित्र्यं किञ्चिद् युक्तिपथमारुह्य सिद्ध्यति। न हि रक्तं दण्डमजानानः 'रक्तदण्डवान् पुरुष' इति प्रत्येति, निश्चिन्वन् रक्तं दण्डं तथा प्रत्येति। अतोऽन्वयव्यतिरेकाभ्यां रक्तत्वविशिष्टदण्डवैशिष्ट्यावगाहिबोधानां रक्तत्वप्रकारकनिश्चयकारणकत्वमनुमीयते। विशिष्टवैशिष्ट्यावगाहिबोधं प्रति विशेषणतावच्छेदकप्रकारकनिश्चयः कारणमिति यावत्। क्वचिच्च, विशेषणतावच्छेदकधर्मनिश्चयं विनापि 'रक्तदण्डवान् पुरुष' इत्याद्याकारकं ज्ञानमभ्युपगन्तव्यं भवति। एकत्वविशिष्टकर्तुरज्ञानेऽपि क्षित्यङ्कुरादीनां सकर्तृकत्व-व्याप्यवत्तापरामर्शात् लाघवोपनीतैकत्वज्ञानसहकृतात् एकत्वविशिष्टकर्तृकत्वा-वगाह्यनुमितिदर्शनात्। दण्डव्याप्यवत्तापरामर्शाद् रक्तत्वप्रकारकदण्डनिर्णयं विनैव रक्तेतरदण्डस्य पुरुषे बाधनिश्चये सति 'रक्तदण्डवान् पुरुष' इत्यनुमितेर्दर्शनाच्च।

तदेतद् विशेष्ये विशेषणमिति रीत्या जायमानं न विशेषणतावच्छेदकरक्तत्वादिप्रकारकं ज्ञानमपेक्षते। किन्तु, रक्तत्वादितत्तद्विशेषणानां विशृङ्खलोपस्थितिमात्रम्। अतोऽस्य विशिष्टज्ञानसापेक्षात् विशिष्टवैशिष्ट्यबोधाद् वैलक्षण्यमवश्योपपादनीयम्। न च 'रक्तो दण्ड' इति विशिष्टज्ञानसाधारणेन विशृङ्खलोपस्थित्त्वेन विशिष्टवैशिष्ट्यबोधसाधारणेन विशिष्टविशेषणकज्ञानत्वेन च हेतुहेतुमद्भावोपगमादेव सर्वसामञ्जस्ये निरुक्तवैचित्र्यकल्पनमप्रामाणिकमिति वाच्यम्। विशृङ्खलोपस्थितिमूलकस्य 'रक्तदण्डवान् पुरुष' इति निश्चयस्य रक्तत्व-तद्विशिष्टदण्डादिसंशयानिवर्तकतायाः विशिष्टज्ञानमूलकस्य तु तन्निश्चयस्य तन्निवर्तकताया एव तत्र वैचित्र्यकल्पकत्वात्।

विशिष्टवैशिष्ट्यावगाहित्वम्

विशिष्टवैशिष्ट्यावगाहिबोधं प्रति विशेषणतावच्छेदकप्रकारकनिश्चयः कारणमिति प्राप्ते, कार्यतावच्छेदकं विशिष्टवैशिष्ट्यबोधत्वं निष्कर्षणीयम्। तद्धि न तावत् विशिष्टप्रतियोगिकवैशिष्ट्यावगाहित्वम्, व्यधिकरणसम्बन्धावगाहिभ्रमे 'संयोगेन दण्डनीलवान् अयम्' इत्यादौ व्यभिचारात्। नापि विशिष्टप्रकारकत्वं, 'काञ्चनमयवह्निमान्' इत्यादिभ्रमे प्रकारीभूतविशिष्टाप्रसिद्ध्या व्यभिचारात। नापि विशेषणान्तरप्रकारेण भासमानप्रकारकत्वम्, 'रक्तो दण्डः दण्डवान् पुरुष' इति समूहालम्बने व्यभिचारात्। नापि विशेषणान्तरप्रकारतानिरूपितविशेष्यत्वावच्छिन्न-प्रकारताकत्वं, प्रत्येकपदार्थोपस्थितिमात्रमूलके 'रक्तदण्डवान्' इति ज्ञाने व्यभिचारात्। अपि तु, तद्रूपनिष्ठप्रकारतानिरूपितविशेष्यतावच्छिन्नप्रकारतानिरूपिता तद्रूपावच्छिन्नप्रतियोगिताकत्वावच्छिन्ना या संसर्गता तन्निरूपकबोधत्वमेव। 'रक्तो दण्ड' इति ज्ञानोत्तरमुत्पन्ने 'रक्तदण्डवान् पुरुष' इति ज्ञाने दण्डसंसर्गतायां संयोगनिष्ठायां रक्तत्वावच्छिन्नप्रतियोगिताकत्वमवच्छेदकतया भासते।

यद्वा तद्रूपनिष्ठस्ववच्छिन्नतद्धर्मिनिष्ठप्रतियोगिताकसम्बन्धावच्छिन्नतद्धर्मिनिष्ठ-तत्सम्बन्धावच्छिन्नप्रकारतावच्छिन्नविशेष्यतनिरूपितप्रकारतावच्छिन्नप्रकारतानिरूपकबोध-त्वमेव तत्। विशिष्टज्ञानसापेक्षे 'रक्तदण्डवान् पुरुष' इति ज्ञाने रक्तत्वं समावायेन दण्डे प्रकारतापन्नं सदेव स्वावच्छिन्नदण्डनिष्ठप्रतियोगिताकसंयोगसम्बन्धेन धर्मिघटितेन पुरुषे प्रकारीभूय भासते। प्रत्येकपदार्थोपस्थितिमूलके 'रक्तदण्डवान् पुरुष' इति बोधे तु दण्डस्य न रक्तत्वावच्छिन्नप्रतियोगिकसंयोगः ससंर्गतया भासते, अपि तु संयोगमात्रम्। न वा रक्तत्वस्य स्वावच्छिन्नप्रतियोगिकसंयोगेन पुरुषे प्रकारता, किन्तु समवायेन दण्डे एव।

केचित्तु – तद्रूपविशिष्टपर्याप्तप्रकारताकत्वमेव तत्। विशिष्टज्ञानमूलके 'रक्तदण्डवान् पुरुष' इति बोधे दण्डनिष्ठप्रकारता रक्तत्वान्तर्भावेणैव पर्याप्ता। प्रत्येकपदार्थोपस्थितिमूलके बोधे तु दण्डप्रकारता दण्डमात्रे पर्याप्ता, न रक्तत्वान्तर्भावेणेति वदन्ति।

अत्र मते, दर्शितविशिष्टज्ञानस्य पुरुषनिनिष्ठविशेष्यतानिरूपितरक्त-त्वनिष्ठाप्रकारताकत्वेन 'पुरुषो न रक्तः' इति निश्चयप्रतिबद्ध्यत्वमापतति। तच्च, इतरप्रकारतानवच्छिन्नरक्तत्वप्रकारतायाः प्रतिबद्ध्यताच्छेदकत्वमुपगम्य वारणीयम्, निरुक्तज्ञाने रक्तत्वनिष्ठप्रकारतायाः दण्डसाधारण्या दण्डविशेष्यतानिरूपितरक्तत्वप्रकारतया अवच्छिन्नत्वात्। एवञ्च, प्रकारताविशेषस्य व्यासज्यवृत्तेः प्रत्येकोपस्थितिमूलक-विशिष्टज्ञानव्यावृत्तस्योपगमे, तस्यैव विशेषणतावच्छेदकप्रकारकधीजन्यतावच्छेदकत्व-सम्भवे लाघवमस्त्येव। तथापि, प्रकारविशेषणस्य प्रकारतावच्छेदकत्वमेव न तु प्रकारत्वं मानाभावात्।

अपरे, तु तद्रूपावच्छिन्नतन्निष्ठप्रकारताकत्वमेव तद्रूपविशिष्टवैशिष्ट्या-वगाहित्वम्। यथा 'भूतलं घटवदिति' ज्ञाने भूतलत्वादेः धर्मितावच्छेदकता न केवलभूतलनिष्ठविशेष्यतानिरूपितप्रकारतारूपा, भूतलत्वस्य घटधर्मितावच्छेदकतावत् विपरीतस्यापि सम्भवात्। अपि तु, विलक्षणविषयतैव। सा च प्रकारतारूपा तदन्यैव वा। तथा विशेषणतावच्छेदकताऽपि विलक्षणविषयतैव 'रक्तो दण्ड' इति ज्ञानसापेक्षज्ञानीयैव रक्तत्वादिविषयता। अत एतदेव ज्ञानं रक्तत्वावच्छिन्नदण्डनिष्ठ-प्रकारताकं भवति। प्रत्येकोपस्थितिमूलकं तु ज्ञानं न तादृशं, अपि तु रक्तत्वनिष्ठ-प्रकारतानिरूपितदण्डविशेष्यतावच्छिन्नप्रकारताकमात्रम् इति प्राहुः।

अत्र मते, प्रकारविशेषणस्य प्रकारतावच्छेदकतायाः युक्तियुक्तत्वेऽपि प्रत्येकोपस्थितिमूलके 'रक्तदण्डावान् पुरुष' इत्यादिज्ञानेऽपि रक्तत्वादीनां दण्डविशेषणतायास्तुल्यतया अनवच्छेदकत्वे विनिगमकं दुर्लभम्। विषयभेदमन्तरा विषयताभेदस्य दुर्घटत्त्वात्।

विशिष्टवैशिष्ट्यबोधसामग्री

विशिष्टवैशिष्ट्यावगाहिबोधहेतुस्तु विशेषणतावछेदकप्रकारको निश्चय एव। न तु संशयोऽपि। 'रक्तदण्डवान्' इति तादृशबोधस्य 'दण्डो रक्त' इति निश्चययोत्तरं जननात्। 'दण्डों रक्तो न वा' इति संशयोतरमजननात्। 'दण्डो रक्तो न वा' इत्यादि संशयस्तु विशेष्ये विशेषणमिति रीत्या 'रक्तदण्डवान् पुरुष' इति बुद्धिं प्रति

प्रतिबन्धकः कल्प्यते, तदुत्तरं तस्याप्यजननात्। प्रत्येकोपस्थितिरूपक्लृप्तसामग्री-सद्भावाच्च। यद्यप्येवं विशेषणतावच्छेदकप्रकारकज्ञानस्य निश्चयत्वेन कारणत्वोपगमेऽपि संशयस्य विशेष्ये विशेषणमिति रीत्या ज्ञानप्रतिबधकताया आवश्यकत्वे तत्प्रतिबद्ध्यतावच्छेकतायाः विशिष्टवैशिष्ट्यावगाहि बोधसाधारण्योपगमेनैव निरुक्तसंशयोत्तरं विशिष्टवैशिष्टयबोधवारणसम्भवात् विशिष्टवैशिष्ट्यावगाहिबोधं प्रति विशेषणतावच्छेदकप्रकारकजानत्वेनैव कारणता लाघवात् स्वीकर्तुमुचिता, तथापि रक्तत्वादिसंशयद्वितीयक्षणे लौकिकसन्निकर्षवशात् तन्निश्चये जाते तद्द्वितीयक्षणे तद्विशिष्टवैशिष्ट्यबोधो जायमानः संशयप्रतिबद्धयतावच्छेदकाक्रान्तत्वे नोपपद्यत इत्यतो विशिष्टवैशिष्टयविषयताभित्तविषयतैव संशयप्रतिबद्ध्यतावच्छेदिकोपगम्यते। एवं सति संशयोत्तरं विनापि निश्चयं विशिष्टवैशिष्ट्यधीप्रसङ्गवारणाय नि श्चयत्वेन हेतुता स्वीक्रियते।

संशयप्रतिबद्ध्यतावच्छेदककुक्षौ प्रत्यक्षत्वं देयम्। अन्यथा, यत्र दण्डे रक्तत्वस्य संशयः, 'पुरुषो दण्डव्याप्यवान्' इति परामर्शघटितानुमितिसामग्री च वर्तते, रक्तेतरदण्डस्य पुरुषे बाधग्रहश्च, तत्रोत्पद्यमानायाः केवलं विशेष्ये विशेषणमिति रीत्या 'रक्तदण्डवान् पुरुषः' इत्युमितेः विशिष्टवैशिष्ट्यविषयताभिन्नविषयताकत्वेन व्यभिचारप्रसङ्गः। अलौकिकत्वमपि विशेषणं देयम्। तेन, 'रक्तो दण्डो न वा' इति संशयोत्तरं लौकिकसन्निर्षात् विशेष्ये विशेषणमिति रीत्या 'रक्तदण्डवान्' इति प्रात्यक्षिकबोधोदयेऽपि न क्षतिः।

एवं सति, विशिष्टवैशिष्ट्यविषयताभिन्नत्वं न देयम्। रक्तत्वसंशये सति तन्निश्चयाद् अलौकिकप्रात्यक्षिको विशिष्टवैशिष्ट्यबोधो यत्र, तत्र व्यभिचारवारणाय तन्निश्चयविरहवैशिष्ट्यस्य तत्संशये निवेशानीयत्वात्। तथा च तन्निश्चयविरहविशिष्ट-तत्प्रकारकसंशयः तद्विशेष्यप्रकारकलौकिकप्रत्यक्षत्वावच्छिन्नं प्रति प्रतिबन्धक इति फलितम्।

न चैवं सति नि श्चयत्वेन कारणता निर्युक्तिकैव, संशयोत्तरं नि श्चयमन्तरा विशिष्टवैशिष्ट्यबोधापत्तेः संशयप्रतिबन्धकतयैव निरासादिति वाच्यम्। संशयबलाद् इतरबाधाद्युपनीतरक्तत्वादिविशेषितदण्डाद्यनुमितौ विशिष्टिवैशिष्ट्यावगाहिताप्रसङ्गस्य, संशयोत्तरं लौकिकसन्निकर्षवशाद् उत्पन्नप्रत्यक्षे च 'रक्तदण्डवान् पुरुष' इत्याकारके विशिष्टवैशिष्ट्यविषयताप्रसङ्गस्य च वारणाय निश्चयत्वेन हेतुताया आवश्यकत्वात्।

विशिष्टवैशिष्ट्यबुद्धौ नि श्चयत्वेन हेतुत्वे, 'दण्डो रक्तो न वा' इति विशेषणसंशयोत्तर'रक्तदण्डवान् न वा पुरुष' इति विशिष्टवैशिष्ट्यावगाहिनः विशिष्टसंश-

यस्यानुपपत्तिर्नाशङ्कनीया, तत्र रक्तत्वप्रकारकनिश्चयलक्षणस्य कारणस्यापि सत्त्वात्। तथाहि – दण्डत्वसामानाधिकरण्येन रक्तत्वनिश्चये सत्येव चैत्रीयदण्डत्वावच्छेदेन रक्तत्वाभावावगाहिनः 'चैत्रीयदण्डो रक्तो न वा' इति विशेषणसंशयात् 'चैत्रः रक्तदण्डवान् न वा' इति विशिष्टसंशय उदेति। न हि दण्डत्वसामानाधिकरण्येन रक्तत्वनिश्चयः चैत्रीयदण्डत्वावच्छेदेन रक्तत्वाभावबुद्धेः विरोधी। न च निरुक्तविशेषणसंशयाधीनो विशिष्टसंशयः विशेष्ये विशेषणम् इति रीत्यैव, न तु विशिष्टवैशिष्ट्ययावगाहीति वाच्यम्। प्रतियोगिविशेषिताभावबुद्धेः विशिष्टवैशिष्ट्यबोधमर्यादानुल्लङ्घननियमेन 'रक्तदण्डवान् न वा चैत्र' इति संशयस्य अभावांशे रक्तत्वविशिष्टदण्डवैशिष्ट्यावगाहिताया आवश्यकत्वात्।

प्रतियोगिविशेषिताभावबुद्धेः लौकिकप्रत्यक्षात्मिकाया एवोक्तनियमस्वीकारे, संशये कोट्ययोरुपनयादेव भानेन अभावभानस्य लौकिकानात्मकतया विशेष्ये विशेषणमिति रीत्या संशयस्य सम्भवेऽपि तत्र रक्तत्वविशष्टिदण्डवैशिष्ट्यानवगाहनेन दण्डसामान्याभावावगाहितया 'दण्डवान् चैत्र' इति निश्चयोत्तरं तत्संशयस्यानुपपत्तिः।

'दण्डो रक्तो न वा' इति संशयोत्तरं जायमाने 'दण्डे रक्तं सन्देह्मि' इत्यनुव्यवसाये ज्ञानांशे रक्तत्वविशिष्टदण्डवैशिष्ट्यं नावगाह्यते। दण्डमद्वारीकृत्यैव रक्तत्वस्य ज्ञाने वैशिष्ट्यभानात्। अतो न तत्र रक्तत्वनिश्चयविरहेऽपि व्यभिचारः।

विशिष्टवैशिष्ट्यधीहेतुतायाः इच्छादिसाधारण्यम्

विशेषणतावच्छेदकप्रकारकनिश्चयत्वं हि तादृशप्रकारकसंशयान्यज्ञानत्वम्। तत्र ज्ञानत्वं न निवेश्यते, तस्य निरुक्तविशिष्टवैशिष्ट्यबोधकारणतायाः न्यूनवृत्तित्वेनानवच्छेदकत्वात्। निरुक्तकारणताया इच्छादिसाधारण्यात्। विशेषणतावच्छेदकप्रकारकेभ्य इच्छाद्वेषकृतिसंस्कारेभ्योऽपि तादृशनिश्चयमन्तरा विशिष्टवैशिष्ट्यावगाहिबोधजन्नात्। तथाहि– यत्र इष्टसाधनताज्ञानात् मधुरफलेच्छा ततः इच्छात्वनिर्विकल्पकं, ततः 'मधुरं फलमिच्छामि' इति साक्षात्कारो भवति। तत्र माधुर्यविशिष्टफलवैशिष्ट्यम् इच्छायाम् अवगाहमाने अनुव्यवसाये माधुर्यविशिष्टफलविषयणी इच्छैव हेतुरुपयेते। ज्ञानस्य तादृशस्य पूर्वक्षणे नाशात्। इच्छात्वादिनिर्विकल्पकं नरसिंहाकारकमिति सिद्धान्तानुगुणमिच्छात्वनिर्विकल्पकस्य इच्छांशे विशिष्टवैशिष्टबोधात्मकत्वमुपेत्य तेन ज्ञानेन उत्तरत्रनुव्यवसायस्योत्पादः, इष्टसाधनताज्ञानेन विनश्यदवस्थेन तन्निर्विकल्पकय विशिष्टवैशिष्ट्यावगाहिबोधस्योत्पादश्च यद्यपि उपपादयितुं याक्यते। तथापि यत्र फलसाधानताज्ञानं, फलेच्छा, उपायेच्छा, इच्छात्वनिर्विकल्पकं, विशिष्टानुव्यवसायः

क्रमेण भवन्ति तत्र विशिष्टवैशिष्ट्यावगाहिनो निर्विकल्पकात् पूर्वक्षणे विशिष्टज्ञानस्य विनाशेन न ज्ञानहेतुतया विशिष्टवैशिष्ट्य- बोधनिर्वाहः, अपि तु तत्र क्षणे उत्पन्नेच्छायाः हेतुतयैव।

एवं, यत्र द्विष्टसाधनताज्ञानं, दुःखद्वेषः, अम्लफलाद्युपायद्वेषः, द्वेषत्वनिर्विकपकं द्वेषेऽम्लत्वविशिष्टफलवैशिष्ट्यावगाहि, द्वेषानुव्यवसायः तत्र निर्विकल्पकस्य विाष्टवैशिष्ट्यावगाहिताया उपपादनाय द्वेषसाधारण्यं कारणताया उपगन्तव्यम्।

एवं यत्र रक्तत्वादिविशिष्टदण्डादिकृतिः, ततः कृतित्वनिर्विकल्पकं तदुत्तरं विशिष्टकृतिसाक्षात्कारः तत्र कृत्यंशे रक्तत्वविशिष्टदण्डवैशिष्ट्यावगाहिबोधनिर्वाहाय विशिष्टकृतेः कारणत्वमावश्यकम्। न चात्र विषयविशिष्टकृतेः साक्षात्कारस्य विशिष्टज्ञानात्मकस्य विशेषणज्ञानहेतुकत्वसंरक्षणय विशेषणावगाहिस्मरणं पूर्वक्षणे कल्पनीयमिति तेनैव निर्विकल्पकस्य विशिष्टशिष्ट्यावगाहिता निर्वहतीति वाच्यम्। विशेषणज्ञानस्य विशेषणविषयकत्वेन हेतुत्वोपगमेनैव विशिष्टज्ञाने तद्धेतुकत्वसंरक्षणात्। तत्र दण्डादिरूपविशेषणावगाहिकृतेरेव उक्तरूपाक्रान्ताया विशिष्टज्ञानपूर्वभा-विन्यास्तन्निर्वाहकत्वात्।

एवं, विशेषणतावच्छेदकप्रकारकसंस्कारात् तादृशज्ञानमन्तरेणापि विशिष्टवैशिष्ट्यावगाहिस्मरणं भवति। अनुद्बुद्धतादृशसंस्कारात् विशिष्टस्मरणवारणाय अनुद्बुद्धसंस्कारभेदो निवेशनीयः।

फलितकार्यकारणभावनिष्कर्षः

तद्रूपनिष्ठतद्रूपावच्छिन्नप्रकारतानिरूपित तद्धर्मिनिष्ठ तद्धर्मावच्छिन्न विशेष्यतावच्छिन्न प्रकारतनिरूपित - तद्रूपावच्छिन्न प्रतियोगिताकत्ववच्छिन्न - संसर्गता-निरूपक बुद्धित्वावच्छिन्नं प्रति संशयभिन्नत्वे सति अनुद्बुद्धसंस्कारभिन्नत्वे सति तद्रूपनिष्ठतद्रूपावच्छिन्नप्रकारतानिरूपिततद्धर्मिनिष्ठतद्धर्मावच्छिन्नविशेष्यताकत्वावच्छिन्नं कारणमिति। यद्वा तद्रूपनिष्ठतद्रूपावच्छिन्नस्वावच्छिन्नतद्धर्मिनिष्ठ प्रतियोगिताक-सम्बन्धावच्छिन्न-तद्धर्मिनिष्ठ तद्धर्मावच्छिन्नत्त्सम्बन्धावच्छिन्न प्रकारतावच्छिन्नविशेष्यता-निरूपिताप्रकारतावच्छिन्न-प्रकारताक बुद्धित्वावच्छिन्नं प्रति निरुक्तं कारणमिति।

गुणत्वेन रक्तरूपप्रकारकात् 'गुणवान् दण्ड' इति ज्ञानात् रक्तत्वेन रक्तावगाहिनः 'रक्तदण्डवान्' इति विशिष्टवैशिष्ट्यबोधस्य वारणाय कार्यताकारणतावच्छेदककोटौ तद्रूपप्रकारतयोरेकधर्मावच्छिन्नत्वनिवेशः। 'द्रव्यं रक्तम्' इति ज्ञानात् 'रक्तदण्डवान् पुरुष' इति विशिष्टवैशिष्ट्यबोधानुदयात् तत्र धर्मिविशेष्यतयोरेकधर्मावच्छिन्नत्वनिवेशः।

तद्घटस्य रक्तत्वं द्रव्यत्वं च ज्ञातवतोऽपि द्रव्यत्वावच्छिन्ने तद्घटे रक्तत्वज्ञानमन्तरेण 'रक्तद्रव्यवान् पुरुष' इति बोधस्य द्रव्यत्वेन तद्घटवैशिष्ट्यावगाहिन उपपत्तये कारणदिशि धर्मिविशेष्यतायां तद्धमावच्छिन्नत्वं स्वावच्छिन्नत्वस्वनिरूपितविशेष्यता-सामानाधिकरण्यान्यतरसम्बन्धेन तद्धर्मविशिष्टत्वरूपं विवक्षितम्। रक्तत्वेन एतद्दण्डस्य ज्ञाने तद्दण्डस्य त्वज्ञाने तद्दण्डावगाहिनः 'रक्तदण्डवान् पुरुष' इति बोधस्य वारणाय एकधर्मिविषयताप्रवेशः।

विशेषणतावच्छेदकदण्डाद्यंशे निर्धर्मितावच्छेदककस्य 'दण्डिमान् देश' इत्याद्याकारकस्य दण्डविशिष्टवैशिष्ट्यबोधस्य तु विशेषणतावच्छेदकदण्डादि-प्रकारकज्ञानमात्रं हेतुः। न तु तादृशनिश्चय एव। 'दण्डवान् न वा' इति संशयेऽपि निरुक्तबोधोदयात्। तदनुरोधेन, कारणतावच्छेदकशरीरे ज्ञानत्वं निवेश्य, उभयत्र तद्धर्मिविशेष्यतायाम् अवच्छेदकधर्ममनिवेश्य पृथक् कार्यकारणभावो वाच्यः।

एवं, निरवच्छिन्नविशेषणतावच्छेदकप्रकारकात् 'रक्त' इत्याद्याकारकात् ज्ञानात् तादृशरक्तत्वांशे निर्धर्मितावच्छेदककस्य 'रक्तवान् दण्ड' इति बोधस्य उत्पादानुरोधेन तयोः पृथक्कार्यकारणभाव उभयत्र तद्रूपनिष्ठप्रकारतायां निवच्छिन्नत्वं प्रवेश्योपगन्तव्य इति।

आकारग्रन्थः- अनुमानगादाधर्याम् अनुमितिप्रकरणम्।